श्री विष्णोर्नाम स्तोत्रं (नरसिंहपुराणे)

श्री विष्णोर्नाम स्तोत्रं (नरसिंहपुराणे)

श्रीमहादेव उवाच |
विष्णुर्जिष्णुर्विभुर्देवो यज्ञेशो यज्ञपालकः |
प्रभविष्णुर्ग्रसिष्णुश्च लोकात्मा लोकपालकः || 1 ||

केशवः केशिहा कल्पः सर्वकारणकारणं |
कर्मकृद्वामनाधीशो वासुदेवः पुरुष्टुतः || 2 ||

आदिकर्ता वराहश्च माधवो मधुसूदनः |
नारायणो नरो हंसो विष्णुसेनो हुताशनः || 3 ||

ज्योतिष्मान् द्युतिमान् श्रीमानायुष्मान् पुरुषोत्तमः |
वैकुंठः पुंडरीकाक्षः कृष्णः सूर्यः सुरार्चितः || 4 ||

नरसिंहो महाभीमो वज्रदंष्ट्रो नखायुधः |
आदिदेवो जगत्कर्ता योगेशो गरुडध्वजः || 5 ||

गोविंदो गोपतिर्गोप्ता भूपतिर्भुवनेश्वरः |
पद्मनाभो हृषीकेशो विभुर्दामोदरो हरिः || 6 ||

त्रिविक्रमस्त्रिलोकेशो ब्रह्मेशः प्रीतिवर्धनः |
वामनो दुष्टदमनो गोविंदो गोपवल्लभः || 7 ||

भक्तिप्रियोऽच्युतः सत्यः सत्यकीर्तिर्ध्रुवः शुचिः |
कारुण्यः करुणो व्यासः पापहा शांतिवर्धनः || 8 ||

संन्यासी शास्त्रतत्त्वज्ञो मंदारगिरिकेतनः |
बदरीनिलयः शांतस्तपस्वी वैद्युतप्रभः || 9 ||

भूतावासो गुहावासः श्रीनिवासः श्रियः पतिः |
तपोवासो दमो वासः सत्यवासः सनातनः || 10 ||

पुरुषः पुष्कलः पुण्यः पुष्कराक्षो महेश्वरः |
पूर्णः पूर्तिः पुराणज्ञः पुण्यज्ञः पुण्यवर्धनः || 11 ||

शंखी चक्री गदी शार्ङ्गी लांगली मुशली हली |
किरीटी कुंडली हारी मेखली कवची ध्वजी || 12 ||

जिष्णुर्जेता महावीरः शत्रुघ्नः शत्रुतापनः |
शांतः शांतिकरः शास्ता शंकरः शंतनुस्तुतः || 13 ||

सारथिः सात्त्विकः स्वामी सामवेदप्रियः समः |
सावनः साहसी सत्त्वः संपूर्णांशः समृद्धिमान् || 14 ||

स्वर्गदः कामदः श्रीदः कीर्तिदः कीर्तिनाशनः |
मोक्षदः पुंडरीकाक्षः क्षीराब्धिकृतकेतनः || 15 ||

स्तुतः सुरासुरैरीश प्रेरकः पापनाशनः |
त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारस्त्वमग्नयः || 16 ||

त्वं स्वाहा त्वं स्वधा देव त्वं सुधा पुरुषोत्तम |
नमो देवादिदेवाय विष्णवे शाश्वताय च || 17 ||

अनंतायाप्रमेयाय नमस्ते गरुडध्वज |
इत्येतैर्नामभिर्दिव्यैः संस्तुतो मधुसूदनः || 18 ||

इति श्रीनरसिंहपुराणे चत्वारिंशोऽध्याये महादेवकृत श्री विष्णोर्नाम स्तोत्रं |